श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ दुवयच्चुरुक्कु ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ दुवयच्चुरुक्कु ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

पृच्छन्त्यामिन्दिरायाममृतभुवि हितं संप्रवक्त्रोपकर्त्रा
कारुण्यात्सस्पृहाच्च श्रुतिशिखरलसद्वाक्ययुग्मं मिलित्वा।
मन्त्रश्चेत्यात्मवाचा धनमतिशयितं चोपदिष्टं त्रयीषु
व्याप्तैरर्थैर्विशिष्टो दशभिरपि भवत्यक्षयोऽस्मन्निधिर्हि ॥ **1** ॥

आत्मानं संश्रितेषु स्वत इह सततं चेतनाचेतनेषु
व्याप्यैवात्माऽपि सर्वाण्यतिभयवचनान्याश्रितानां निशम्य।
नाथं चाऽऽश्राव्य याऽघं विघटकमवमद्योभयोः प्रेमभूम्ना
प्राप्याङ्घ्र्योः प्रापिका यो लसति सह मयोज्जृम्भतेऽन्तस्तया नः ॥ **2** ॥

एकीभूतेऽन्तरात्मन्यधिकरुचिमहानन्दरूपे परस्मिन्
आविर्भूतेषु रूपेष्वत उदिततनुष्वेकरूपेष्वतोऽपि।
सर्वान्तर्यामिरूपेष्वथ इत उदितेष्वर्च्यरूपेषु चैका -
कृत्यां ऋज्व्यां स्थिरायां प्रिय उपवसति प्राप्य चित्तं हरिर्नः ॥ **3** ॥

विश्वेषां यो निदानं पतिरखिलगतिस्सर्ववस्त्वास्पदं च
श्रुत्यन्त्योक्तश्च बन्धुस्सकलविध इहापेत विश्लेष आत्मा।
ज्योतिर्नारायणो नस्सकलशुभगुणालङ्कृतो व्याप्तकीर्तिः
नाथः प्रीत्या स्वसेवाकरणपटुतमान् कर्तुमन्तस्स्थितो नः ॥ **4** ॥

माध्वीपूर्णारुणश्रीचरण उपवसन् धाम नित्योपसेव्यं
नित्याकारः क्रमेण ह्युपगतचतुराकार इच्छाविसारः।
लीलाकूर्मो वराहाकृतिरिति विभवाकार आत्मान्तरात्मा
सर्वालोकोचितार्चाकृतिरिह चरणौ न्यस्तवान् मानसे नः॥ 5॥

अस्मान् देवान्नरोपासनकरदुरितान्मोचयन् सन्नियन्ता
दत्वोपायं तदीयं फलमपि करुणाळुश्च सन्त्रायमाणः।
सौरभ्यावासभूतां स्वशिरसि तुलसीमालिकां धारयन् सन्
संरक्षत्यच्युतश्रीमधुभरमृदुलेनाङ्घ्रिपुष्पद्वयेन॥ 6॥

प्राप्स्यामस्तं पुमर्थं वयमिति महतां लभ्यमाशावतो नः
आवेद्याकिञ्चनत्वं त्वपगतविरहावस्थितावादृतांश्च।
कृत्वा स्वं गाढमत्योज्ज्वलशरणमितीवानुभूतेः प्रदातुः
श्रीवत्सोरस्स्थलस्यैव हि परपुरुषस्याभवामाभिरक्ष्याः॥ 7॥

सर्वान् दुर्ज्ञेयवेदानपि न हि विसृजामस्त्विति ज्ञातवद्भिः
कर्म ज्ञानं च भक्तिं त्रितयमुपगृहीतं समीक्ष्य प्रवृत्ताः।
नानुष्ठाने किल स्मस्स्थितिरियमनुवर्तेत पश्चादपीति
व्यामुग्धानां विना नः क उभयपतिमाश्लिष्टमं रक्षकोऽस्ति॥ 8॥

निस्सङ्कोचं समस्तं विसृतमविचलं सौधपाथोधिवच्च
श्रीमान्नारायणो नस्त्वविरतमविनाभावसंरक्षितात्मा।
येष्वप्राप्तं फलं तद्व्यवहितकरुणेष्वत्र कालेषु लब्धुं
विश्वासं प्राप्य चेतः परममितमविश्लेषिता मोदितास्स्मः॥ 9॥

तीव्रं तापत्रयं तन्निजपदशरणानां च हर्तुं विधर्तुः
दीक्षाबद्धं किरीटं धृतजलदरुचेः पादयोर्लोकमात्रोः।
धर्तारो ह्युत्तमाङ्गे वयमिह तदुदारादरादेत्य रीतिं
न्यासान्यासक्रियायाः प्रियतरपरिचर्या विधातुं नतास्स्मः॥ 10॥

स्वीया नैते न चापि स्वयमिति निगमोदीरितं सर्वमेव
स्वीयं चेति स्वयं चेत्यवगतिसुलभां हीनतां स्वान्तरूढाम्।
विज्ञायाद्यैव तूक्तेः नम इति विगमात् हीनतायाश्च तस्याः
ताताेऽसाधारणोऽयं चतुरतम इह ह्यात्मशेषाखिलार्थः॥ **11**॥

सन्धात्र्या लोकमातुर्नियमयितुरियं नित्यसम्बन्धता च
सर्वस्मादुत्तमस्योचितगुणगणतो लक्ष्यभूते स्वरूपे।
भव्यात्मीयाङ्घ्रियुग्मं शरणवरणताऽकिञ्चनत्वं पुमर्थः
इत्येषां युक्तसीमाभुव इव गणयामासिमाद्याऽनवद्याः॥ **12**॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीदेशिकप्रबन्धस्थाः द्वयसङ्ग्रहगाथिकाः।
सार्थाः श्लोकीकृतास्सर्वाः गोपालार्येण सन्मुदे॥

॥ इति द्वयसङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥